॥ श्रीगुरुभ्यो नमः ॥

कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

तृतीयकाण्डे पञ्चमः प्रश्नः

इष्टिशेषाभिधानं

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

पूर्णा पश्चादुत पूर्णा पुरस्तादुन्मद्ध्यतः पौर्णमासी जिगाय। तस्यान्देवा अधि सँव्वसन्त उत्तमे
नाक इह मादयन्ताम्॥ यत्ते देवा अदधुर् भागधेयममावास्ये सँव्वसन्तो महित्वा। सा नो
यज्ञम्पिपृहि विश्ववारे रयिन्नो धेहि सुभगे सुवीरम्॥ निवेशनी सङ्गमनी वसूनाँव्विश्वा रूपाणि
वसूँन्यावेशयन्ती। सहस्रपोषꣳ सुभगा रराणा सा न आ गन् वर्चसा ॥ [१] ॥ सँव्विदाना॥
अग्नीषोमौ प्रथमौ वीर्येण वसूँन् रुद्रानादित्यानिह जिन्वतम्। माद्ध्यꣳ हि पौर्णमासञ्जुषेथाम्ब्र-
ह्मणा वृद्धौ सुकृतेन सातावथाऽस्मभ्यꣳ सहवीराꣳ रयिन्नि यच्छतम्॥ आदित्याश्चाऽङ्गिरस-
श्चाग्नीनाऽदधत ते दर्शपूर्णमासौ प्रैफ्सन् तेषामङ्गिरसान्निरुप्तꣳ हविरासीदथाऽऽ*दित्या एतौ
होमावपश्यन् तावजुहवुस्ततो वै ते दर्शपूर्णमासौ ॥ [२] ॥ पूर्व आऽलभन्त दर्शपूर्णमासा-
वालभमान एतौ होमौ पुरस्ताज्जुहुयाथ् साक्षादेव दर्शपूर्ण मासावा लभते ब्रह्मवादिनो वदन्ति
स त्वै दर्शपूर्णमासावा लभेत य एनयोरनुलोमञ्च प्रतिलोमञ्च विद्यादित्यमावास्याया ऊर्द्ध्व-
न्तदनुलोमम्पौर्णमास्यै प्रतीचीनन्तत् प्रतिलोमयँय्यत् पौर्णमासीम्पूर्वामालभेत प्रतिलोममेनावा
लभेतामुमपक्षीयमाणमन्वप ॥ [३] ॥ क्षीयेत सारस्वतौ होमौ पुरस्ताज्जुहुयादमावास्या
वै सरस्वत्यनुलोममेवैनावा लभते ऽमुमाप्यायमानमन्वा प्यायत आग्नावैष्णव मेकादशकपा-
लम्पुरस्तान्निर्वपेथ् सरस्वत्यै चरुꣳ सरस्वते द्वादशकपालयँय्यदाग्नेयो भवत्यग्निर् वै यज्ञमुखयँय्य-
ज्ञमुखमेवर्द्धिम्पुरस्ताद्धत्ते यद्वैष्णवो भवति यज्ञो वै विष्णुर्यज्ञमेवाऽऽ*रभ्य प्र तनुते सरस्वत्यै

चरुर् भवति सरस्वते द्वादशकपालोऽमावास्या वै सरस्वती पूर्णमासः सरस्वान् तावेव साक्षादा रभत ऋध्नोत्याभ्यान्द्वादशकपालः सरस्वते भवति मिथुनत्वाय प्रजात्यै मिथुनौ गावौ दक्षिणा समृद्ध्यै ॥ [४] ॥

(वर्चसा वै ते दर्शपूर्णमासा वपं तनुते सरस्वत्यै पञ्चविꣳशतिश्च) ॥ १ ॥

ऋषयो वा इन्द्रम्प्रत्यक्षन्नापश्यन् तँव्वँसिष्ठः प्रत्यक्षमपश्यथ् सोऽब्रवीद्ब्राह्मणन्ते वक्ष्यामि यथा त्वत्पुरोहिताः प्रजाः प्रजनिष्यन्तेऽथ मेतरेभ्य ऋषिभ्यो मा प्र वोच इति तस्मा एतान्थ्स्तोमभागानब्रवीत् ततो वसिष्ठपुरोहिताः प्रजाः प्राजायन्त तस्माद्वासिष्ठो ब्रह्मा कार्यः प्रैव जायते रश्मिरसि क्षयाय त्वा क्षयञ्जिन्वे ॥ [५] ॥ त्याह देवा वै क्षयो देवेभ्य एव यज्ञम्प्राऽऽ*ह प्रेतिरसि धर्माय त्वा धर्मञ्जिन्वेत्याह मनुष्या वै धर्मो मनुष्येभ्य एव यज्ञम्प्राऽऽ*हान्वितिरसि दिवे त्वा दिवञ्जिन्वेत्याहैभ्य एव लोकेभ्यो यज्ञम्प्राऽऽ*ह विष्टम्भोऽसि वृष्ट्यै त्वा वृष्टिञ्जिन्वेत्याह वृष्टिमेवाव ॥ [६] ॥ रुन्धे प्रवाऽस्यनुवाऽसीत्याह मिथुनत्वायोशिगसि वसुभ्यस्त्वा वसूञ्जिन्वेत्याहाष्टौ वसव एकादश रुद्रा द्वादशाऽऽ*दित्या एतावन्तो वै देवास्तेभ्य एव यज्ञम्प्राऽऽ*हौजोऽसि पितृभ्यस्त्वा पितृन् जिन्वेत्याह देवानेव पितृननु सन्तनोति तन्तुरसि प्रजाभ्यस्त्वा प्रजा जिन्वे ॥ [७] ॥ त्याह पितृनेव प्रजा अनु सन्तनोति पृतनाषाडसि पशुभ्यस्त्वा पशूञ्जिन्वेत्याह प्रजा एव पशूननु सन्तनोति रेवदस्योषधीभ्य स्त्वौषधीर् जिन्वेत्याहौषधीष्वेव पशून् प्रति ष्ठापयत्यभिजिदसि युक्तग्रावेन्द्राय त्वेन्द्रञ्जिन्वेत्याहाभिजित्या अधिपतिरसि प्राणाय त्वा प्राणं ॥ [८] ॥ जिन्वेत्याह प्रजास्वेव प्राणान् दधाति त्रिवृदसि प्रवृदसीत्याह मिथुनत्वाय सꣳरोहोऽसि नीरोहोऽसीत्याह प्रजात्यै वसुकोऽसि वेषश्रिरसि वस्यष्टिरसीत्याह प्रतिष्ठित्यै ॥ [९] ॥

(जिन्वेत्यव प्रजा जिन्व प्राणन् त्रिꣳशच्च) ॥ २ ॥

अग्निना देवेन पृतना जयामि गायत्रेण छन्दसा त्रिवृता स्तोमेन रथन्तरेण साम्ना वषट्कारेण वज्रेण पूर्वजान् भ्रातृव्यानधरान् पादयाम्यवैनान् बाधे प्रत्येनान्नुदेऽस्मिन् क्षयेऽस्मिन्

भूमिलोके योऽस्मान् द्वेष्टि यञ्च वयन्द्विष्मो विष्णोः क्रमेणाऽत्येनान् क्रामामीन्द्रेण देवेन पृतना जयामि त्रैष्टुभेन छन्दसा पञ्चदशेन स्तोमेन बृहता साम्ना वषट्कारेण वज्रेण ॥ [१०] ॥ सह-जान्विश्वेभिर् देवेभिः पृतना जयामि जागतेन छन्दसा सप्तदशेन स्तोमेन वामदेव्येन साम्ना वषट्कारेण वज्रेणापरजानिन्द्रेण सयुजो वयꣳ सासह्याम पृतन्यतः। घ्नन्तो वृत्राण्यप्रति। यत्ते अग्ने तेजस्तेनाहन्तेजस्वी भूयासँय्यत्ते अग्ने वर्चस्तेनाहँव्वर्चस्वी भूयासँय्यत्ते अग्ने हरस्तेनाहꣳ हरस्वी भूयासम् ॥ [११] ॥

(बृहता साम्ना वषट्कारेण वज्रेण षट्चत्वारिꣳशच्च) ॥ ३ ॥

ये देवा यज्ञहनो यज्ञमुषः पृथिव्यामद्ध्यासते। अग्निर् मा तेभ्यो रक्षतु गच्छेम सुकृतो वयम्॥ आऽगन्म मित्रावरुणा वरेण्या रात्रीणाम्भागो युवयोर् यो अस्ति। नाकङ्गृह्णानाः सुकृतस्य लोके तृतीये पृष्ठे अधि रोचने दिवः॥ ये देवा यज्ञहनो यज्ञमुषोऽन्तरिक्षेऽद्ध्यासते। वायुर् मा तेभ्यो रक्षतु गच्छेम सुकृतो वयम्॥ यास्ते रात्रीः सवितर् ॥ [१२] ॥ देवयानीरन्तरा द्यावापृथिवी वियन्ति। गृहैश्च सर्वैः प्रजया न्वग्रे सुवो रुहाणास्तरता रजाꣳसि॥ ये देवा यज्ञहनो यज्ञमुषो दिव्यद्ध्यासते। सूर्यो मा तेभ्यो रक्षतु गच्छेम सुकृतो वयम्॥ येनेन्द्राय समभरः पयाꣳस्युत्तमेन हविषा जातवेदः। तेनाऽग्ने त्वमुत वर्द्धयेमꣳ सजातानाꣳ श्रैष्ठ्य आ धेह्येनम्॥ यज्ञहनो वै देवा यज्ञमुषः ॥ [१३] ॥ सन्ति त एषु लोकेष्वासत आददाना विमथ्नाना यो ददाति यो यजते तस्य। ये देवा यज्ञहनः पृथिव्यामद्ध्यासते ये अन्तरिक्षे ये दिवीत्याहेमानेव लोकाꣳस्तीर्त्वा सगृहः सपशुः सुवर्गँल्लोकमेत्यप वै सोमेनेजानाद् देवताश्च यज्ञश्च क्रामन्त्याग्नेयं पञ्चकपालमुदवसानीयन्निर्वपेदग्निः सर्वा देवताः ॥ [१४] ॥ पाङ्क्तो यज्ञो देवताश्चैव यज्ञञ्चाव रुन्धे गायत्रो वा अग्निर् गायत्रछन्दा स्तञ्छन्दसा व्यर्द्धयति यत् पञ्चकपालङ्करोत्यष्टाकपालः कार्योऽष्टाक्षरा गायत्री गायत्रोऽग्निर् गायत्रछन्दाः स्वेनैवैनञ्छन्दसा समर्द्धयति पङ्क्त्यौ याज्या-नुवाक्ये भवतः पाङ्क्तो यज्ञस्तेनैव यज्ञान् नैति ॥ [१५] ॥

(सवितर् देवा यज्ञमुषः सर्वा देवता स्त्रिचत्वारिꣳशच्च) ॥ ४ ॥

सूर्यो मा देवो देवेभ्यः पातु वायुरन्तरिक्षाद्यजमानोऽग्निर् मा पातु चक्षुषः। सक्ष शूष सवितर् विश्वचर्षण एतेभिः सोम नामभिर् विधेम ते तेभिः सोम नामभिर् विधेम ते॥ अहम्परस्तादहमवस्तादहञ्ज्योतिषा वि तमो ववार। यदन्तरिक्षन्तदु मे पिताऽभूदहꣳ सूर्यमुभयतो ददर्शाहम्भूयासमुत्तमः समानाना ॥ [१६] ॥ मा समुद्राद्दाऽन्तरिक्षात् प्रजापतिरुदधिञ्च्यावयातीन्द्रः प्र स्नौतु मरुतो वर्षयन्तून्नंभय पृथिवीम्भिन्धीदन्दिव्यन्नभः। उद्नो दिव्यस्य नो देहीशानो वि सृजा दृतिम्। पशवो वा एते यदादित्य एष रुद्रो यदग्निरोषधीः प्रास्याग्नावादित्यञ्जुहोति रुद्रादेव पशूनन्तर् दधात्यथो ओषधीष्वेव पशून् ॥ [१७] ॥ प्रति ष्ठापयति कविर् यज्ञस्य वि तनोति पन्थान्नाकस्य पृष्ठे अधि रोचने दिवः। येन हव्यँव्वहसि यासि दूत इतः प्रचेता अमुतः सनीयान्॥ यास्ते विश्वाः समिधः सन्त्यग्ने याः पृथिव्याम्बर्हिषि सूर्ये याः। तास्ते गच्छन्त्वाहुतिङ्घृतस्य देवायते यजमानाय शर्म॥ आशासानः सुवीर्यꣳ रायस्पोषꣳ स्वश्वियम्। बृहस्पतिना राया स्वगाकृतो मह्यय्यँजमानाय तिष्ठ ॥ [१८] ॥

(समानानामोषधीष्वेव पशून्मह्यय्यँजमानायैकञ्च) ॥ ५ ॥

सन्त्वा नह्यामि पयसा घृतेन सन्त्वा नह्याम्यप ओषधीभिः। सन्त्वा नह्यामि प्रजयाऽहमद्य सा दीक्षिता सनवो वाजमस्मे॥ प्रैतु ब्रह्मणस्पत्नी वेदिँव्वर्णेन सीदतु। अथाहमनुकामिनी स्वे लोके विशा इह॥ सुप्रजसस्त्वा वयꣳ सुपत्नीरुप सेदिम। अग्ने सपत्नदम्भनमदब्धासो अदाभ्यम्॥ इमव्विँष्यामि वरुणस्य पाश ॥ [१९] ॥ यमबध्नीत सविता सुकेतः। धातुश्च योनौ सुकृतस्य लोके स्योनम्मे सह पत्या करोमि॥ प्रेह्युदेह्यृतस्य वामीरन्वग्नि स्तेऽग्रन्नयत्वदितिर् मध्यन्ददताꣳ रुद्रावसृष्टाऽसि युवा नाम मा मा हिꣳसीर् वसुभ्यो रुद्रेभ्य आदित्येभ्यो विश्वेभ्यो वो देवेभ्यः पन्नेजनीर् गृह्णामि यज्ञाय वः पन्नेजनीः सादयामि विश्वस्य ते विश्वावतो वृष्णियावत ॥ [२०] ॥ स्तवाग्ने वामीरनु सन्दृशि विश्वा रेताꣳसि धिषीयाऽगन् देवान् यज्ञो नि देवीर्देवेभ्यो यज्ञमशिषन्नस्मिन्थ् सुन्वति यजमान आशिषः स्वाहाकृताः समुद्रेष्ठा गन्धर्वमा तिष्ठतानु। वातस्य पत्मन्निड ईडिताः ॥ [२१] ॥

(पाशं वृष्णियावत त्रिꣳशच्च) ॥ ६ ॥

वषट्कारो वै गायत्रियै शिरोऽच्छिनत् तस्यै रसः पराऽपतथ् स पृथिवीम्प्राविशथ् स खदिरोऽभवद् यस्य खादिरः स्रुवो भवति छन्दसामेव रसेनाव द्यति सरसा अस्याऽऽ*हुतयो भवन्ति तृतीयस्यामितो दिवि सोम आसीत् तङ्गायत्र्याऽहरत् तस्य पर्णमच्छिद्यत तत् पर्णोऽभवत् तत् पर्णस्य पर्णत्वय्ँयस्य पर्णमयी जुहूर् ॥ [२२] ॥ भवति सौम्या अस्याऽऽ*हुतयो भवन्ति जुषन्तेऽस्य देवा आहुतीर्देवा वै ब्रह्मन्नवदन्त तत् पर्ण उपाऽ*शृणोथ् सुश्रवा वै नाम यस्य पर्णमयी जुहूर् भवति न पापꣳ श्लोकꣳ शृणोति ब्रह्म वै पर्णो विण् मरुतोऽन्नव्ँविण् मारुतोऽश्वत्थो यस्य पर्णमयी जुहूर् भवत्याश्वत्थ्युपभृद् ब्रह्मणैवान्नमव रुन्धेऽथो ब्रह्मै ॥ [२३] ॥ व विश्यध्यूहति राष्ट्रव्ँवै पर्णो विडश्वत्थो यत् पर्णमयी जुहूर् भवत्याश्वत्थ्युपभृद्राष्ट्रमेव विश्यध्यूहति प्रजापतिर् वा अजुहोथ् सा यत्राऽऽहुतिः प्रत्यतिष्ठत् ततो विकङ्कत उदतिष्ठत् ततः प्रजा असृजत यस्य वैकङ्कती ध्रुवा भवति प्रत्येवास्याऽऽ*हुतय स्तिष्ठन्त्यथो प्रैव जायत एतद्वै स्रुचाꣳ रूपय्ँयस्यैवꣳ रूपाः स्रुचो भवन्ति सर्वाण्येवैनꣳ रूपाणि पशूनामुप तिष्ठन्ते नास्यापरूपमात्मञ्जायते ॥ [२४] ॥

(जुहू रथो ब्रह्म स्रुचाꣳ सप्तदश च) ॥ ७ ॥

उपयामगृहीतोऽसि प्रजापतये त्वा ज्योतिष्मते ज्योतिष्मन्तङ्गृह्णामि दख्षाय दख्षवृधे रातं देवेभ्योऽग्नि जिह्वेभ्यस्त्वर्तायुभ्य इन्द्रज्येष्ठेभ्यो वरुणराजभ्यो वातापिभ्यः पर्जन्यात्मभ्यो दिवे त्वाऽन्तरिख्षाय त्वा पृथिव्यै त्वाऽपेन्द्र द्विषतो मनोऽप जिज्यासतो जह्यप यो नोऽरातीयति तञ्जहि प्राणाय त्वाऽपानाय त्वा व्यानाय त्वा सते त्वाऽसते त्वाऽद्भ्यस्त्वौषधीभ्यो विश्वेभ्यस्त्वा भूतेभ्यो यतः प्रजा अक्खिद्रा अजायन्त तस्मै त्वा प्रजापतये विभूदाव्न्ने ज्योतिष्मते ज्योतिष्मन्तञ्जुहोमि ॥ [२५] ॥

(ओषधीभ्य श्चतुर्दश च) ॥ ८ ॥

याँव्वा अद्ध्वर्युश्च यजमानश्च देवतामन्तरितस्तस्या आ वृश्च्येते प्राजापत्यन्दधिग्रहङ्गृह्णीयात् प्रजापतिः सर्वा देवता देवताभ्य एव नि ह्नुवाते ज्येष्ठो वा एष ग्रहाणाँय्यस्यैष गृह्यते ज्यैष्ठ्य-मेव गच्छति सर्वासाँव्वा एतद् देवतानाꣳ रूपय्यँदेष ग्रहो यस्यैष गृह्यते सर्वाण्येवैनꣳ रूपाणि पशूनामुपतिष्ठन्त उपयामगृहीतो ॥ [२६] ॥ ऽसि प्रजापतये त्वा ज्योतिष्मते ज्योतिष्मन्त-ङ्गृह्णामीत्याह ज्योतिरेवैनꣳ समानानां करोत्यग्निजिह्वेभ्यस्त्वर्तायुभ्य इत्याहैतावतीर् वै देवता-स्ताभ्य एवैनꣳ सर्वाभ्यो गृह्णात्यपेन्द्र द्विषतो मन इत्याह भ्रातृव्यापनुत्त्यै प्राणाय त्वाऽपानाय त्वेत्याह प्राणानेव यजमाने दधाति तस्मै त्वा प्रजापतये विभूदाव्न्ने ज्योतिष्मते ज्योतिष्मन्तञ्जु-होमी ॥ [२७] ॥ त्याह प्रजापतिः सर्वा देवताः सर्वाभ्य एवैनन्देवताभ्यो जुहोत्याज्यग्रहङ्गृ-ह्णीयात् तेजस्कामस्य तेजो वा आज्यन्तेजस्व्येव भवति सोमग्रहङ्गृह्णीयाद्ब्रह्मवर्चसकामस्य ब्रह्म-वर्चसँव्वै सोमो ब्रह्मवर्चस्येव भवति दधिग्रहङ्गृह्णीयात् पशुकामस्योर्ग्वै दद्ध्यूर्क् पशव ऊर्जैवास्मा ऊर्जम्पशूनव रुन्धे ॥ [२८] ॥

(उपयामगृहीतो जुहोमि त्रिचत्वारिꣳशच्च) ॥ ९ ॥

त्वे क्रतुमपि वृञ्जन्ति विश्वे द्विर् यदेते त्रिर् भवन्त्यूमाः। स्वादोः स्वादीयः स्वादुना सृजा समत ऊ षु मधु मधुनाऽभि योधि। उपयामगृहीतोऽसि प्रजापतये त्वा जुष्टङ्गृह्णाम्येष ते योनिः प्रजापतये त्वा॥ प्राणग्रहान् गृह्णात्येतावद् व्वा अस्ति यावदेते ग्रहाः स्तोमाश्छन्दाꣳसि पृष्ठानि दिशो यावदेवास्ति त ॥ [२९] ॥ दव रुन्धे ज्येष्ठा वा एतान् ब्राह्मणाः पुरा विदामक्रन् तस्मात् तेषाꣳ सर्वा दिशोऽभिजिता अभूवन्यस्यैते गृह्यन्ते ज्यैष्ठ्यमेव गच्छत्यभि दिशो जयति पञ्च गृह्यन्ते पञ्च दिशः सर्वास्वेव दिख्ष्वृद्धवन्ति नवनव गृह्यन्ते नव वै पुरुषे प्राणाः प्राणानेव यज-मानेषु दधति प्रायणीये चोदयनीये च गृह्यन्ते प्राणा वै प्राणग्रहाः ॥ [३०] ॥ प्राणैरेव प्रयन्ति प्राणैरुद् यन्ति दशमेऽहन् गृह्यन्ते प्राणा वै प्राणग्रहाः प्राणेभ्यः खलु वा एतत् प्रजा यन्ति यद् वामदेव्यय्योनेश्च्यवते दशमेऽहन् वामदेव्यय्योनेश्च्यवते यद्दशमेऽहन् गृह्यन्ते प्राणेभ्य एव तत् प्रजा न यन्ति ॥ [३१] ॥

(तत् प्राणग्रहाः सप्तविंꣳशच्च) ॥ १० ॥

प्र देवन्देव्या धिया भरता जातवेदसम्। हव्या नो वक्षदानुषक्॥ अयमु ष्य प्रदेवयुर्होता यज्ञाय नीयते। रथो न योरभीवृतो घृणीवान् चेतति त्मना॥ अयमग्निरुरुष्यत्यमृतादिव जन्मनः। सहसश्चिथ् सहीयान् देवो जीवातवे कृतः॥ इडायास्त्वा पदे वयन्नाभा पृथिव्या अधि। जातवेदो नि धीमह्यग्ने हव्याय वोढवे ॥ [३२] ॥ अग्ने विश्वेभिः स्वनीक देवैरूर्णावन्तम्प्रथमः सीद योनिम्। कुलायिनङ्घृतवन्तꣳ सवित्रे यज्ञन्नय यजमानाय साधु॥ सीद होतः स्व उ लोके चिकित्वान्थ् सादया यज्ञꣳ सुकृतस्य योनौ। देवावीर् देवान्हविषा यजास्यग्ने बृहद्यजमाने वयो धाः॥ नि होता होतृषदने विदानस्त्वेषो दीदिवाꣳ असदथ् सुदक्षः। अदब्धव्रतप्रमतिर् वसिष्ठः सहस्रम्भरः शुचिजिह्वो अग्निः॥ त्वन्दूतस्त्व ॥ [३३] ॥ मु नः परस्पास्त्वँस्य आ वृषभ प्रणेता। अग्ने तोकस्य नस्तने तनूनामप्रयुच्छन् दीद्यद् बोधि गोपाः॥ अभि त्वा देव सवितरीशानँव्वार्याणाम्। सदाऽवन् भागमीमहे॥ मही द्यौः पृथिवी च न इमय्यँज्ञम्मिमिक्षताम्। पिपृतान्नो भरीमभिः॥ त्वामग्ने पुष्करादध्यथर्वा निरमन्थत। मूर्ध्नो विश्वस्य वाघतः॥ तमु ॥ [३४] ॥ त्वा दध्यङ् ऋषिः पुत्र ईधे अथर्वणः। वृत्रहणम्पुरन्दरम्॥ तमु त्वा पाथ्यो वृषा समीधे दस्युहन्तमम्। धनञ्जयꣳ रणेरणे॥ उत ब्रुवन्तु जन्तव उदग्निर् वृत्रहाऽजनि। धनञ्जयो रणेरणे॥ आ यꣳ हस्ते न खादिनꣳ शिशुञ्जातन्न बिभ्रति। विशामग्निꣳ स्वध्वरम्॥ प्र देवन्देववीतये भरता वसुवित्तमम्। आ स्वे योनौ नि षीदतु॥ आ ॥ [३५] ॥ जातञ्जातवेदसि प्रियꣳ शिशीताऽतिथिम्। स्योन आ गृहपतिम्॥ अग्निनाऽग्निः समिध्यते कविर् गृहपतिर् युवा। हव्यवाड् जुह्वास्यः॥ त्वꣳ ह्यग्ने अग्निना विप्रो विप्रेण सन्थ् सता। सखा सख्या समिध्यसे॥ तम्मर्जयन्त सुक्रतुम्पुरोयावानमाजिषु। स्वेषु क्षयेषु वाजिनम्॥ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्। ते ह नाकम्महिमानः सचन्ते यत्र पूर्वे साध्याः सन्ति देवाः ॥ [३६] ॥

(वोढवे दूतस्त्वं तमु सीदत्वा यत्र चत्वारि च) ॥ ११ ॥

समाप्ति कोर्वैः

(पूर्ण ऋषयो ऽग्निना ये देवाः सूर्यो मा सन्त्वा नह्यामि वषट्कारः स खदिर उपयामगृहीतोऽसि याँव्वै त्वे क्रतुं प्रदेव मेकादश)
(पूर्णा सहजान् तवाँऽग्ने प्राणैरेव षड्विँशत्)
(पूर्णा सन्ति देवाः)
(प्रजापतियों वाअग्नेवि वैपूर्णा पञ्च)

॥ हरिः ॐ ॥

तृतीयकाण्डे पञ्चमः प्रश्नः समाप्तः

अनुवाकाः	पञ्चशत्यः
११	३६

ॐ